# Mantrapushpa

# मन्त्रपुष्पम्

## Document Information

Text title : mantrapushpaM

File name : mantrapushpa.itx

Category : veda, svara, mantra

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Description-comments : taittirIyAraNyakam aruNaprashnaH 7784, taittirIyAraNyake prathamaprapAThakaH dvAviMsho.anuvAkaH

Latest update : June 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2025

*sanskritdocuments.org*

# मन्त्रपुष्पम्

## सस्वरः

ॐ

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः ॥

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ १॥

अग्निर्वा अपामायतनम्। आयतनवान् भवति ।
योऽग्नेरायतनं वेद । आयतनवान् भवति ।
आपो वा अग्नेरायतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ २॥

वायुर्वा अपामायतनम्। आयतनवान् भवति ।
यो वायोरायतनं वेद । आयतनवान् भवति ।
आपो वै वायोरायतनम्। आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ३॥

असौ वै तपन्नपामायतनम्। आयतनवान् भवति ।
योऽमुष्य तपत आयतनं वेद । आयतनवान् भवति ।
आपो वा अमुष्य तपत आयतनम्। आयतनवान् भवति ।

य ए॒वं वेद॑ । योऽपामाय॑तनं॒ वेद॑ । आ॒यत॑नवान् भवति ॥ ४॥

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति ।
यश्च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।
आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम्। आ॒यत॑नवान् भवति ।
य ए॒वं वेद॑ । योऽपामाय॑तनं॒ वेद॑ । आ॒यत॑नवान् भवति ॥ ५॥

न॑क्षत्राणि॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति ।
यो न॑क्षत्राणा॒माय॑तनं॒ वेद॑। आ॒यत॑नवान् भवति ।
आपो॒ वै न॑क्षत्राणा॒माय॑तनम्। आ॒यत॑नवान् भवति ।
य ए॒वं वेद॑ । योऽपामाय॑तनं॒ वेद॑ । आ॒यत॑नवान् भवति ॥ ६॥

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति ।
यः प॒र्जन्य॑स्या॒ऽऽयत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।
आपो॒ वै प॒र्जन्य॑स्या॒ऽऽयत॑नम्। आ॒यत॑नवान् भवति ।
य ए॒वं वेद॑ । योऽपामाय॑तनं॒ वेद॑ । आ॒यत॑नवान् भवति ॥ ७॥

सं॒व॒त्स॒रो वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति ।
यस्सं॑वत्स॒रस्या॒ऽऽयत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।
आपो॒ वै सं॑वत्स॒रस्या॒ऽऽयत॑नम् । आ॒यत॑नवान् भवति ।
य ए॒वं वेद॑। यो᳚ऽप्सु नावं॒ प्रति॑ष्ठितां॒ वेद॑ । प्रत्ये॒व ति॑ष्ठति ॥ ८॥

रा॒जा॒धि॒रा॒जाय॑ प्रसह्यसा॒हिने᳚ ।
नमो॑ व॒यं वै᳚श्रव॒णाय॑ कु॒र्महे ।
स मे॒ कामा॒न्काम॒कामा॑य॒ मह्य᳚म् ।
का॒मे॒श्व॒रो वै᳚श्रव॒णो द॑दातु ।
कु॒बे॒राय॑ वै᳚श्रव॒णाय॑ । म॒हा॒रा॒जाय॒ नमः॑ ।
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

तैत्तिरीयारण्यकम् अरुणप्रश्नः ७७-८४

# निःस्वरः

ॐ

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः ॥

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ १॥

अग्निर्वा अपामायतनम्। आयतनवान् भवति ।
योऽग्नेरायतनं वेद । आयतनवान् भवति ।
आपो वा अग्नेरायतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ २॥

वायुर्वा अपामायतनम्। आयतनवान् भवति ।
यो वायोरायतनं वेद । आयतनवान् भवति ।
आपो वै वायोरायतनम्। आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ३॥

असौ वै तपन्नपामायतनम्। आयतनवान् भवति ।
योऽमुष्य तपत आयतनं वेद । आयतनवान् भवति ।
आपो वा अमुष्य तपत आयतनम्। आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ४॥

चन्द्रमा वा अपामायतनम् । आयतनवान् भवति ।
यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति ।
आपो वै चन्द्रमस आयतनम्। आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ५॥

नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति ।
यो नक्षत्राणामायतनं वेद। आयतनवान् भवति ।
आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति ।

य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ६॥

पर्जन्यो वा अपामायतनम्। आयतनवान् भवति ।
यः पर्जन्यस्याऽऽयतनं वेद । आयतनवान् भवति ।
आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ७॥

संवत्सरो वा अपामायतनम्। आयतनवान् भवति ।
यस्संवत्सरस्याऽऽयतनं वेद । आयतनवान् भवति ।
आपो वै संवत्सरस्याऽऽयतनम् । आयतनवान् भवति ।
य एवं वेद। योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ८॥

राजाधिराजाय प्रसह्यसाहिने ।
नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान्कामकामाय मह्यम् ।
कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय । महाराजाय नमः ।

ॐ शान्तिः शान्तिः शान्तिः ॥

तैत्तिरीयारण्यकम् अरुणप्रश्नः ७७-८४
तैत्तिरीयारण्यके प्रथमप्रपाठकः द्वाविंशोऽनुवाकः

Encoded with Accents by Rajagopal Iyer

*Mantrapushpa*

pdf was typeset on June 23, 2025

Please send corrections to *sanskrit@cheerful.com*